Shodhshauryam, International Scientific Refereed Research Journal
© 2021 SHISRRJ | Volume 4 | Issue 4 | ISSN : 2581- 6306

# आयुर्वेद ग्रंथेषु गुणदोषाणां वैशिष्ट्यम्



डा.दिनेश कुमार मालवीय
पीएच. डी. शोधार्थी, राजकीय आयुर्वेद महाविद्यालय, वाराणसी, एवं रीडर, शासकीय आयुर्वेद महाविद्यालय, ग्वालियर।

प्रोफेसर डा. ए. के. सोनकर
प्रोफेसर एवं विभागाध्यक्ष, शरीर क्रिया विज्ञान, राज. आयुर्वेद महाविद्यालय, वाराणसी।

**Article Info**
Volume 4, Issue 4
Page Number : 14-17
**Publication Issue :**
July-August-2021
**Article History**
Accepted : 03 July 2021
Published : 10 July 2021

**सारांश** :- द्विषो वा बहुषोवाअपिज्ञात्वादोषेषुचाचरेत्। तदर्थं कश्यते द्रव्यगुणानां ज्ञाने पाञ्चभौतिक शरीर मध्ये रोगानां निर्धारण निदानञ्च सम्यक्रूपेण भवितुमर्हति त्रिदोजनिवारणार्थञ्च पथ्यापथ्य वोधार्थञ्च् निदानोपचारार्थम् दृव्यगुणानां ज्ञानस्य महती आवश्यकता वर्तते।

**मुख्यशब्द** :- गुणदोषः, द्रव्यगुणः, शरीरः,रोगः, निदानः, लाभो, वेदः, आयुः।

---

आयुषो वेदः आयुर्वेदः अथवा आयुर्विन्दत्यनेन इत्यायुर्वेदः। यस्य आयुषो ज्ञानं लाभो वा आयुर्वेदेन लभ्यते वा तदायुः किम् इति ज्ञातव्यम्, तत्रोच्यते शरीर - जीवयोर्योगःजीवनं तदवच्छिन्नकालः आयुरिति। उक्तं चरकाचार्येण - चक संहितायां

शरीरेन्द्रियसत्त्वात्मसंयोगोधारिजीवितम्।
नित्यगश्चानुबन्धश्च पर्यायैरायुरूच्यते।।[1]

शरीरम, इन्द्रियाणि सत्त्वम् (मनस्) आत्मन् इत्येतेषां संयोगः एव आयुः कथ्यते। धारि जीवितम् नित्यगः अनुबन्धः एते चत्वारः आयोः पर्यायशब्दाः सन्ति।

आयुषो ज्ञानाय लाभाय च प्रथमं शरीरस्य इन्द्रियाणाम्, आत्मनश्च ज्ञानम् आवश्यकं भवति। शरीरं पाञ्चभौतिकम्, इन्द्रियाण्यपि आयुर्वेदे भौतिकान्येव परिगणितानि, अतः शरीररक्षायै पञ्चहाभूतानां ज्ञानं पर्याप्तं नास्ति, यतो हि मानवः केवलं भौतिकः नास्ति, शरीरेण सममेव शरीरिणः ज्ञानमपि आवश्यकम् शरीरस्य कार्मुकत्वेन प्रयुक्तः मनसः अपि ज्ञानम् अपरिहार्य भवति। अतएव भगवान् पुनर्वसु - आत्रेयः उक्तवान्-

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

सत्वमात्मा शरीरं च त्रयमेतत् त्रिदण्डवत्।
लोकस्तिष्ठति संयोगात् तत्र सर्वं प्रतिष्ठितम्।।2

अयं लोकः (कमपुरूषः) सत्त्वम् (मनस्)आत्मा (चेतनाधातुः), शरीरम् (पञ्चहाभौतिकम्) त्रिषु प्रतिष्ठितम् अस्ति।

त्रयाएणां संयोगः समभावेन रक्षणीयो भवति, एतेनैव समत्वेन आयुषो लाभः भवति। एतेषां त्रयाणाम् आत्ममनेन्द्रियशरीराणां समत्वस्य रक्षणम् आयुर्वेदेन एव सम्भवति।

आयुर्वेदस्य आधार भूताः त्रिदोषाः वातपित्तकफाः। दोषाणां साम्यावस्थया आरोग्यं विषमावस्थया अनारोग्यमिति। सायावस्थासम्पादनाय नैकविधनियमाः अभ्यधायि आचार्यैः। तद्यथा ''योगेन चित्रस्य, पदेन वाचां मलं शरीरस्य च वैद्यकेन'' इति 'चित्ते उत्पन्नमलैः अनेकविधमानसिकव्याधयः उपजायन्ते। आधिपदवाच्यास्ते। शारीर वातादिदोषैः ज्वरादिव्याधयः समुत्पद्यन्ते।आधय लिंगशरीरस्य विषयाः, व्याधयः स्थूलशरीरस्य च। आधिव्याधयः जन्तोः स्वकर्मपरिणामः। कर्म च स्वसुकृतदुष्कृतोत्थ बुद्धि वैशद्यम्। बुद्धिः कर्मानुसारिणी इति चिरन्तनाः। अकेनजन्मकृतैः पापैः व्याधिरूपेण पीड्यते।

चिकित्साकर्म निष्कामकर्मरूपेण भारतवर्षे प्रचलति स्म इदमेव पुण्यायतनमिति प्राचीनानां मतिः। अतएव भारते अपृष्ट्वैव चिकित्सां औषधं च जनाः मत्यनुरूपं धर्मार्थ कथयन्ति आधुनिकाः।

आयुर्वेदे द्रव्याणां विस्तेरण निरूपणं विद्यते। अत्र विस्तरभयाद् संक्षेपेण निगद्यते।

द्रव्यलक्षमणम् –

''यत्राश्रिताः कर्मगुणाः कारणं समवायि यत् तद् द्रव्यम्''3

''क्रियागुणवत् समवायिकारणमिति द्रव्यलक्षमणम्।''4

''द्रव्यलक्षणं तु क्रियागुणवत् समवायिकारणम्'' 5 इति।

द्रव्यनिर्देश :–

''खादीन्यात्मा मनः कालो दिराश्र द्रव्यसंग्रहः'' (चरकसू. 9)

''तत्र द्रव्याणि पृथ्विप्तेजोवारवाकाशकालदिगात्ममनांसि नवैव'' (प्रशस्तपादे)। इदानीं आयुर्वेदशास्त्रे द्रव्याणां यल्लक्षणम् उक्तं तत्प्रस्तूयते–

पृथिवी – ''तमोबहुलापृथिवी'' (सुश्रुतसूत्रम्)

जलम्– ''सत्वतमो बहुला आपः'' (...............)

तेजः ''सत्वरजो बहुलोअग्निः'' (...............)

वायुः – ''रजो बहुलो वायुः'' (...............)

आकाशः – ''सत्वबहुलमाकाशम्'' (...............)

दृव्य निदेशानन्तरं गुणानां विषये किञ्चित चर्चा आवश्यकं प्रतीयेता। आयुर्वेदीय पदार्थ विज्ञानं द्रव्यनिरूपणे आदौ पञचमहाभूतानां यथात्त्कं तल्लक्षणं निरूपितम् अन्तरं पृथत्त्कया पञमहाभूतानां नैसर्गिकगुणाः निरूपिताः सन्ति अनन्तरं कालात्मादीनां लक्षणादिकं वर्तते।

पञ्महाभूतानां नैसर्गिकगुणाः भूतानुप्रवेशश्च

महाभूतानि खं वायुरग्निरापः क्षितिस्तथा।

शब्दः स्पर्शरूपश्चरसो गन्धश्च तद्गुणाः।।''

आकाशपवनदहनतोयभूमिषु यथासंख्यमेकोतरपरिवृद्धाः

शब्दस्पर्शरूपरसगन्धाः। (चरक शा. 09)

इतोअपि

''तेषामेकगुणः पूर्वो गुणवृद्धिः परे परे।

पूर्वः पूर्वगुण श्रैव क्रमशो गुणिषुस्मृतः।।''

परस्परसंसर्गात् परस्पपरानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु

सर्वेषां सान्निध्यमस्ति उत्कर्षापकर्षान्तु ग्रहणम्। (च.शा9 सु.सू. 42)

आयुर्वेदे महाभूतानां भौतिकगणाः अपि पृथत्त्कया निर्दिष्टाः सन्ति

''खरद्रवचलोरुष्णं भूजलानिलतेजसाम्

आकाशस्याप्रतिघातो दृष्टं लिग्गं यथाक्रमम्।।'' (च.शा9)

पृथिव्याः खरत्वम्, जलस्य द्रव्यत्वम्, वायेश्रलत्वम्, अंग्रेरूष्णत्वम् आकाशस्य अप्रतिघातत्वम् इति भौतिकगुणाः।

गुण शब्दः गुणआमंत्रणेऽच प्रत्यय गुणयते आमन्त्रयते लोका अनेन इति गुणः समवायीतु निष्चेष्टः कारणं गुणः।

रूक्षः शीतोलघुसूक्ष्मश्चलोंअथविशदः खरः। विपरीतगुणैः द्रव्यैमारूतःसंप्रशाम्यति।।

सस्नेहंउष्णं तीक्ष्णं च द्रवंअम्लंसरंकटु। विपरीतगुणैः पित्तंद्रव्येराशुप्रशाम्यति।।

गुरू शीतमदुस्निग्ध मधुरस्थिरपिच्छिलाः। श्लेष्मणः प्रशमं यान्तिविपरीतगुणैर्गुणाः।।

गुणा य उक्तद्रव्येषु शरीरेष्वपितेतथा।

स्थानव्रद्धिक्षयास्तस्माद्देहिनांद्रव्यहेतुकाः।। (सु.सू. 41/16)

रसदोषसन्निपातेतु येसा यैर्दोषेः समानगुणाः समानगुणभूयिष्ठा वा भवन्तितेवतानभिवर्धयन्ति, विपरितगुणा विपरीतगुणभूयिष्ठा वा शमयन्तभ्यस्यमानाइति।

एतद्यवस्थाहेतोः षट्त्वमुपदिष्यतेरसानांपरस्परेणामसंसृष्टानां त्रित्वं च दोषाणाम्। (च.वि. 1/7)

भूतेजोवारिजैद्रव्यैः शमं यातिसमीरणः। भूम्यम्बुवायुजैः पित्तं क्षिप्रमाप्नोतिनिर्वृतिम्।

खतेजोअनिलजैः श्लेष्मा शममेति शरीरिणाम्(वियत्पवनजाताभ्यांवृद्धिमाप्नोतिमारूतः।

आग्नेयमेव यद् द्रव्यंपित्तमुदीयुर्यते। वसुधाजलजाताभ्यांबलासः परिवर्द्धते।

एवमेतद्गुणाधिक्यंद्रव्येद्रव्येविनिष्चितम्। द्विषो वा बहुषोवाअपिज्ञात्वादोषेषुचाचरेत्।। तदर्थं कश्यते द्रव्यगुणानां ज्ञाने पाञ्चभौतिक शरीर मध्ये रोगानां निर्धारण निदानञ्च सम्यक्रूपेण भवितुमर्हति त्रिदोजनिवारणार्थञ्च पथ्यापथ्य वोधार्थञ्च् निदानोपचारार्थम् दृव्यगुणानां ज्ञानस्य महती आवश्यकता वर्तते।।

**सन्दर्भ –**


(1) चरक सूत्र

(2) चरक सूत्र

(3) चरक संहिता 1.2.13

(4) वैशेसिक सूत्र 1–9/15

(5) सुश्रुत